# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – २ | गुणा: - ७० |
|---|---|---|
| विषय: - फलितज्यौतिषम् | (C.C.- 5.3.7. Old &New ) | |
| दिनाङ्क: - ०५/१२/२०१८ | बृहत्संहिता । | समय: -१०.०० त: १.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: कस्यचित् एकस्य व्याख्यां कुरुत । (५)**

*(अ) किमपि किल भूतमभवद्रुन्धानं रोदसी शरीरेण*
*तदमरगणेन सहसा विनिगुह्याधोमुखं न्यस्तम् ॥*
*यत्र च येन गृहीतं विबुधेनाधिष्ठित: सतत्रैव ।*
*तदमरमयं विधाता वास्तुनरं कल्पयामास ॥*

*(ब) वामेन हरिद्रतरोर्वल्मीकश्चेज्जलं भवति पूर्वे ।*
*हस्तत्रितये सत्र्यंशै: पुम्भि: पञ्चभिर्भवति ॥*
*नीलो भुजङ्ग: पुरुषे मृत पीता मरकतोपमश्चाश्मा ।*
*कृष्णा भू: प्रथमं वारुणी शिरादक्षिणेनान्या ॥*

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि व्याख्यां लिखतु । (१०)**

*(अ) वृक्षात् जलज्ञानम् । (ब) सप्तपर्णवृक्षात् जलज्ञानम् ।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितयो: कस्यचित् एकस्य उपरि व्याख्यां करोतु । (५)**

*(अ) पनशासोककदलीजम्बूलकुचदाडिमा: । द्राक्षापालीवताश्चैव बीजपूरातिमुक्तका: ॥*
*एते द्रुमा: काण्डरोप्या गोमयेन प्रलेपिता: । मूलेच्छेदेऽथवास्कन्धे रोपणीया: परं तत: ॥*

*(ब) अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरतिसुखिन: ।*
*विषमभ्रुवो दरिद्रो बालेन्दुनतभ्रुव: सधना: ॥*
*दीर्घासंसक्ताभिर्धनिन: खण्डाभिरर्थ परिहीना: ।*
*मध्यविनतभ्रुवो ये ते सक्ता: स्त्रीष्वगम्यासु ॥*

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु । (१०)**

*(अ) देवालयविधानम् । (ब) ललाटरेखालक्षणम् ।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितयो: कस्यचित् एकस्य व्याख्यां करोतु । (५)**

*(अ ) मालव्यो नागनास: समभुजयुगलो जानुसम्प्राप्तहस्तौ ।*
*मांसे पूर्णाङ्गसन्धि: समरुचिरतनुर्मध्यभागेकृशश्च ॥*

*पञ्चाष्टौ चोर्ध्वमास्यं श्रुतिविवरमपित्र्यङ्गुलोनं च तिर्य-*

*ग्दीप्ताक्षं सत्कपोलं समसितदशनं नातिमांसाधरोष्ठम् ॥*

*(ब) नो सङ्गते नाति पृथू न लम्बे शस्ते भ्रुवौ बालशशाङ्कचक्रे ।*

*अर्धेन्दुसंस्थानमरोमशं च शस्तं ललाटं न नतं न तुङ्गम् ॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । (१०)**

*(अ) शरीरस्य विभागाः (ब) पञ्चमहापुरुषलक्षणाध्यायस्य सारांशः ।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि व्याख्यां करोतु । (५)**

*(अ) न दिनत्रयं निषेव्यं स्नानं माल्यानुलेपनं स्त्रीभिः । स्नायाच्चतुर्थदिवसे शास्त्रोक्तेनोपदेशेन ॥*

*पुण्य स्नानौषधयोः याः कथितास्ताभिरम्बुमिश्राभिः ।*

*स्नायात्तथात्रमन्त्रः स एव यतस्तत्रनिर्दिष्टः ॥*

*(ब) अत्यम्लतिक्तलवणानि कटूनि वात्ति यः क्षारशाकबहुलानि च भोजनानि ।*

*दृक् शुक्रवीर्यरहितः सकरोत्यनेकान् व्याजान् जरन्निव युवाप्यबलामवाप्य ॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु । (१०)**

*(अ) केशः कृष्णकरणार्थप्रयोगः । (ब) धूपनिर्माणप्रकारः ।*

## पञ्चमान्वितिः

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । (१०)**

*(१) बृहत्संहिताग्रन्थस्य लेखकः कः ?*

*(२) वास्तुपुरुषस्य नामकरणं कः कृतवान् ?*

*(३) कृतयुगशब्दस्य अर्थः कः ?*

*(४) राजा एवं सेनापतिगृहयोः अन्तरतुल्यमानं कस्य गृहस्य मानं भवति ?*

*(५) यदि वास्तुभूमिः पूर्वोत्तरदिशायामुच्चं भवति चेद् फलं किम् ?*

*(६) जलाशयस्य तटे आरामः रोपणीयः न वा ?*

*(७) सर्वेषां वृक्षाणां कृते कोमलभूमिः शुभाशुभं वा ?*

*(८) कूपारम्भः कस्मिन् नक्षत्रे क्रियते ?*

*(९) विना कम्पायमानं हास्यं कथं भवति ?*

*(१०) हंसयोगः कदा भवति ?*

*(११) सत्त्वयुक्तग्रहः कः ?*

*(१२) पुरुषः विषयवासनातः कदा निवृत्तं भवति ?*

*(१३) स्त्रीविषयवासनातः कदा निवृत्ता भवति ?*

*(१४) नपुंसकजातकस्योत्पत्तिः कदा भवति ?*

*(१५) वनितायाः दक्षिणपार्श्वे जन्म भवति चेत् फलं किम् ?*